वङ्गं, क्ली, (वङ्गतीति । वगि गतौ+अच् ।) धातुविशेषः । रां इति भाषा ॥ तत्पर्य्यायः । त्रपुः २ स्वर्णजम् ३ नागजीवनम् ४ मृदङ्गम् ५ रङ्गम् ६ गुरुपत्रम् ७ पिच्चटम् ८ चक्रसंज्ञम् ९ तमरम् १० नागजम् ११ कस्तीरम् १२ आलीनकम् १३ सिंहलम् १४ । इति हेमचन्द्रः । ४ । १०८ ॥ श्वेतम् १५ नागम् १६ त्रपु १७ । इति शब्दरत्नावली ॥ अस्य गुणाः । तिक्तत्वम् । मधुरत्वम् । भेदित्वम् । पाण्डुत्वम् । कृमिवातनाशित्वम् । लेखनत्वम् । किञ्चित्पित्तकारित्वञ्च । इति राजवल्लभः ॥ (अथ वङ्गस्य नामलक्षणगुणाः ।

"रङ्गवङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ।
खुरकं मिश्रकञ्चापि द्विविधं वङ्गमुच्यते ॥
उत्तमं खुरकं तत्र मिश्रकन्त्ववरं मतम् ।
रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन् ॥
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक् ।
सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अस्य शोधनमारणविधिर्यथा,—
"वङ्गं चूर्णोदके स्विन्नं यामार्द्धेन विशुध्यति ॥"
इति वङ्गशुद्धिः ॥
"वङ्गं सतालमर्कस्य पिष्ट्वा दुग्धेन संपुटेत् ।
शुष्काश्वत्थभवैर्व्वल्कैः सप्तधा भस्मतां नयेत् ॥"
मतान्तरम् ।
"वङ्गं खर्परके कृत्वा चुल्ल्यां संस्थापयेत् सुधीः ।
द्रवीभूते पुनस्तस्मिन् चूर्णान्येतानि दापयेत् ॥
प्रथमं रजनीचूर्णं द्वितीये च यमानिका ।
तृतीये जीरकञ्चैव ततश्चिञ्चात्वगुद्भवम् ॥
अश्वत्थवल्कलोत्थञ्च चूर्णं तत्र विनिःक्षिपेत् ।
एवं विधानतो वङ्गं म्रियते नात्र संशयः ॥
वङ्गं तिक्ताम्लकं रूक्षं किञ्चिद्वातप्रकोपनम् ।
मेदःश्लेष्मामयघ्नञ्च क्रिमिघ्नं मेहनाशनम् ॥"
इति वङ्गमारणम् । इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥) अन्यद्रङ्गशब्दे द्रष्टव्यम् ॥ * ॥ सीसकम् । देशविशेषे पुं भूम्नि । इति मेदिनी । गे, २९ ॥ (एकवचनान्तोऽपि । यथा, महाभारते । १ । १०४ । ५० ।
"अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः ॥")
स तु प्राचीदेशान्तर्गतदेशविशेषः । यथा,—
"अङ्गवङ्गा मद्गुरका अन्तर्गिरिवहिर्गिराः ॥"
इत्युपक्रम्य ।
"शाल्वा मागधगोनर्द्दाः प्राच्यां जनपदाः स्मृताः ॥"
इत्यन्तं मत्स्यपुराणवचनम् ॥
मतान्तरं यथा,—
"आग्नेय्यामङ्गवङ्गोपवङ्गत्रिपुरकोवलाः ।
कलिङ्गौड्रान्ध्रकिष्किन्ध्याविदर्भशवरादयः ॥"
इति ज्योतिस्तत्त्वधृतकूर्म्मचक्रवचनम् ॥
तस्य सीमा यथा,—
"रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे ! ।
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥

वङ्गः, पुं, चन्द्रवंशीयवलिराजपुत्त्रः । यथा,—
"वलिः सुतपसो जज्ञे अङ्गवङ्गकलिङ्गकाः ।
सुह्मपौण्ड्राश्च वालेया अनपानस्तथाङ्गतः ॥"
इति गारुडे १४४ अध्यायः ॥ * ॥
(स च वङ्गो दीर्घतमस औरसो वलेः क्षेत्रजश्च । यथा, महाभारते । १ ।१०४।४७-५१।
"ततः प्रसादयामास पुनस्तमृषिसत्तमम् ।
वलिं सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत्पुनः ॥
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसादित्यवर्च्चसः ॥
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ॥
अङ्गस्याङ्गो भवेद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ॥
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ।
एवं वलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")
वार्त्ताकुः । कार्पासः । इति मेदिनी । गे, २९ ॥

वङ्गजं, क्ली, (वङ्गात् धातुविशेषात् जायते इति । जन्+डः ।) सिन्दूरम् । इति रत्नमाला ॥ वङ्गदेशजाते, त्रि ॥

वङ्गनः, पुं, (वङ्गतीति । वगि+ल्युः ।) वार्त्ताकुः । इति शब्दरत्नावली ॥ वेगुन् इति भाषा ॥ (गुणादयोऽस्य वार्त्ताकुशब्दे ज्ञातव्याः ॥)

वङ्गला, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ वङ्गालीति च नामान्तरम् ॥

वङ्गशुल्वजं, क्ली, (वङ्गशुल्वाभ्यां रङ्गताम्राभ्यां जायते इति । जन+डः ।) कांस्यम् । इति हेमचन्द्रः । ४ । ११५ ॥

वङ्गसेनः, पुं, वकवृक्षः । यथा,—
"वङ्गसेनस्त्वगस्तिद्रुः शुकनाशो मुनिद्रुमः ।
अनलिः कुनली ॥" इति त्रिकाण्डशेषः ॥

वङ्गसेनकः, पुं, (वङ्गसेन+स्वार्थे कन् ।) वकवृक्षः । यथा,—
"रक्तपुष्पो मुनितरुरगस्तिर्व्वङ्गसेनकः ॥"
इति रत्नमाला ॥
अस्य पुष्पगुणाः ।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"
इति राजवल्लभः ॥

वङ्गारिः, पुं, (वङ्गस्य रङ्गधातोररिः । अस्य वङ्गधातुजारकत्वात् तथात्वम् ।) हरितालम् । इति हेमचन्द्रः ॥

वङ्गालः, पुं, भैरवरागस्य पुत्त्रः । यथा,—
"वङ्गालः पञ्चमः षष्ठो मधुरो हर्षकस्तथा ।
देशाख्यो माधवः सिन्धुर्भैरवपुत्त्राः प्रकीर्त्तिताः ॥"
अस्य ध्यानम् ।
"कषानिवेशितकरण्डवरस्तपस्वी
भास्वत्त्रिशूलपरिमण्डितवामहस्तः ।
भस्मोज्ज्वलो निविड़बद्धजटाकलापो
वङ्गाल इत्यभिहितस्तरुणार्कवर्णः ॥
षाड़वो देववङ्गालो ग्रहांशन्यासमध्यमः ।
प्रहर्षे विनियोक्तव्यः प्रोक्तोऽयं मुनिना स्वयम् ॥"
इति सङ्गीतरत्नाकरः ॥

वङ्गाली, स्त्री, भैरवरागस्य रागिणी । यथा,—
"भैरवी कौशिकी चैव भाषा वेलावली तथा ।
वङ्गाली चेति रागिण्यो भैरवस्यैव वल्लभाः ॥"
इति सङ्गीतदामोदरः ॥
अस्या मूर्त्तिः ।
"मनोज्ञमुक्तागुणभूषिताङ्गी
शुकं दधाना धरणीधरस्था ।
प्रांशुः कुमारी कमनीयमूर्त्ति-
र्व्वङ्गालिकेयं शुचिसाङ्गगीता ॥"
इति सङ्गीतरत्नाकरः ॥
"वङ्गाली औड़वा ज्ञेया ग्रहांशन्यासषड्जभाक् ।
ऋषहीना च विज्ञेया मूर्च्छना प्रथमा मता ।
पूर्णा वा मद्दयोपेता कल्लिनाथेन भाषिता ॥"
इति सङ्गीतदर्पणम् ॥

वच, औ वाचि । सन्देशे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट् ।) औ, वक्ता । अयं सेम् (सेट्) इत्येके । न वचत्यप्रियं वचः । इति हलायुधः । इति दुर्गादासः ॥

वच, क सन्देशे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) सन्देशो वचनविशेषः । क, वाचयत्यखिलां लिपिमिति हलायुधः । इति दुर्गादासः ॥

वच, ल औ वाचि । इति कविकल्पद्रुमः ॥ (अदा०-पर०-द्विक०-सेट् ।) ल, वक्ति । औ, वक्ता । अस्मादन्तिविभक्तिर्न प्रयोज्या । इत्यालङ्कारिकाः । इति दुर्गादासः ॥ (यथा,—
"वचेरन्त्यनुशन्तृङ्भिः प्रयोगो नाभिधीयते ।
जयतेर्नास्ति पञ्चम्या उत्तमः पुरुषः क्वचित् ॥"
इति बहुसम्मतम् ॥)

वचः, पुं, (वक्तीति । वच्+अच् ।) कीरपक्षी । इति मेदिनी । चे, ६ ॥

वचः, [स्] क्ली, (उच्यते इति । वच्+"सर्व्वधातुभ्योऽसुन् ।" उणा० ४।१८९ । इत्यसुन् ।) वाक्यम् । इत्यमरः ।१।६।१॥ (यथा, रघौ ।२।४१।
"इति प्रगल्भं पुरुषाधिराजो
मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावा-
दात्मन्यवज्ञां शिथिलीचकार ॥")

वचक्नुः, पुं, (वक्तीति । वच्+"स्युवचिभ्योऽन्युजागूजक्नुचः ।" उणा० ३ । ८१ । इति क्नुच् ।) ब्राह्मणः । इति मेदिनी । ने, १२७ ॥